| 1

Copyright © 2020 Vhp. | All rights reserved. . . | 1

अद्य 08.06.2017 सायं षड्वादने भारतसंस्कृतपरिषदा आयोज्यमाने एकादशदिवसीय अखिलभारतीय संस्कृतप्रशिक्षण शिविरेभारतीय जनता पक्षस्य राष्ट्रियप्रवक्तारः पूर्वसांसदाः मन्त्रिणश्च डॉ.विजयसोनकरशास्त्रिणः मुख्यवक्तारः आसन् । अस्मिन् अवसरे ते प्रशिक्षणार्थिनः प्रबोधयन्तः अवदन् यत्श्रीमद्भग्वद्गीता पक्षपातं विना मानवेभ्यः दायित्वं प्रति प्रबोधयति तथा च निष्कामभावनया कर्मकर्तुं जनान् प्रेरयति साक्षात् भगवानकृष्णस्य उपदेशोऽयम् अस्ति यत् मनुष्यः योगे स्थित्वा स्वे-स्वे कर्मणि अभिरतास्सन्तु । अस्मिन्नवसरेगीतामर्मज्ञेनप्रो.बी.डी.शर्मणा विरचितगीतानुवादग्रन्थस्य लोकार्पणमपि जातम् । स्वीये ग्रन्थविषये प्रो.बी.डी.शर्म महोदयः विषयपरकं व्याख्यानं प्रस्तुतवान्। आचार्य मनोड़ी महोदयाः उक्तवन्तो यत् श्रीमद्भगवद्गीता एव सर्वशास्त्रमयी अस्ति मानवधर्मस्य पूर्णं संविधानमस्ति विश्वऽस्मिन् श्रीमद्भग्वद्गीता एव सर्वेषां मानवानां कृते दिव्यजीवनाय प्रेरणां प्रददाति। अस्मिन् सत्रे डॉ.विजयशंकरशास्त्रि महाभागस्य,श्री नीलेशशर्मा
(C.A.) समाजसेवी , श्री हरिओम महाजनः (भा.ज.पा.), श्रमायुक्तः श्रीचन्द्रपालसिंहः (गुरुग्रामः), प्रभृति महानुभावानां सम्मानोऽपि जातः डॉ.श्रेयांशद्विवेदी उपाध्यक्षः हरियाणासंस्कृतअकादमी, डॉ.तुलसीदेवी फिरोजाबादः, कवयित्री श्रीमती तुषाशर्मा (मेरठ), श्री राजविहारीशास्त्री (जयपुरः), कवयित्री श्रीमती सुमनसोनी (भागलपुर, बिहार), डॉ.सुरेशद्विवेदी (पटना), डॉ.महेशव्यास (जामनगर गुजरातः), डॉ.योगेन्द्रकुमारशर्मा (दिल्ली), आचार्य गोविन्दवल्लभः (दिल्ली), आचार्य वासुदेवचमोली (ऋषिकेष उत्तराखण्डः), श्रीमती सरोजभारद्वाजः (मेरठः), श्रीमान मुनीशकुमारः (प्रान्तप्रमुखः हरियाणा) तथा च अनेके गणमान्याः सम्मानसमारोहे उपस्थिताः आसन् ।

उल्लेखनीयमिदं यत् भारतसंस्कृतपरिषदा प्रतिवर्षं जूनमासि एव एकादशदिवसीयं अखिलभारतीयसंस्कृतप्रशिक्षणशिविरं देहल्यामेवायोज्यते । भिन्न-भिन्न प्रदेशेभ्यः शतमिति संख्याकाः शिक्षार्थिनः शिविरे भागं गृह्णन्ति । शिविरेऽस्मिन् भाषाशिक्षणं पाठयति आचार्यो राधाकृष्णमनोड़ी तथैव ज्योतिषविज्ञानं डॉ.योगेन्द्रशर्मा, आयुर्वेदविज्ञानं डॉ.महेशव्यासः, योगविज्ञानं श्रीमति सरोजभारद्वाजा, संगीतं कवयित्री श्रीमती तुषाशर्मा, पत्रकारितां लेखनञ्च श्री सूर्यप्रकाशसेमवालः, संगणके संकृतं डॉ.श्रेयांशद्विवेदी, संस्कृतसम्भाषणं श्रीवासुदेवचमोली,वैदिकप्रबन्धनं आचार्य हनुनत्प्रसादश्च पाठयन्ति ।

गोविन्द वल्लभः (मीडिया प्रभारी)भारत संस्कृत परिषद्